समाम्नायस्य मातृकापाठस्य-- लोकरूढस्यैव इति भावः ॥३॥

## औदन्ताः स्वराः ॥१।१।४॥

**औकाराऽवसाना वर्णाः स्वरसंज्ञाः स्युः (भवन्ति)। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ १४ ॥४॥**

अ० औत् अन्तेऽन्तो वा येषां ते। जस्। 'अत आः०' (१।४।१) इति दीर्घः औदन्ताः। 'राजृग् दुभ्राजि दीप्तौ'। स्वयंपूर्वम्। स्वयं राजन्ते शोभन्ते इति स्वराः 'क्वचित्' (५।१।१७१) इति डः। 'डित्यन्त्यस्वरादेः' (२।१।११४)। 'पृषोदरादयः' (३।२।१५५) इति स्वभावः ॥४॥

## एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः ॥१।१।५॥

**मात्रा कालविशेषः। एकद्वित्र्युच्चारणमात्रा औदन्ता वर्णा यथासङ्ख्यं ह्रस्वदीर्घप्लुतसंज्ञाः स्युः। एकमात्रो ह्रस्वः - अ इ उ ऋ ऌ ५। द्विमात्रो दीर्घः - आ ई ऊ ॠ ॡ ए ऐ ओ औ ९। त्रिमात्रः प्लुतः - आ ३ ई ३ ऊ ३ ॠ ३ ॡ ३ ए ३ ऐ ३ ओ ३ औ ३ ॥५॥**

अ० एका च द्वे च तिस्रश्च एकद्वित्रिस्रः। एकाद्वितिस्रो मात्रा येषां ते एकद्वि०। 'सर्वादयोऽस्यादौ' (३।२।६१) एकेत्यत्र पुंवद्भावः। मात्रेत्यत्र 'गोश्चान्ते ह्रस्व०' (२।४।९६) इति ह्रस्वः। ततो जस्। 'एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते। प्लुतः स्वरस्त्रिमात्रः स्याद्व्यञ्जनं चार्द्धमात्रकम्' ॥१॥ ॥५॥

## अनवर्णा नामी ॥१।१।६॥

**अवर्णवर्जा औदन्ता वर्णा नामिसंज्ञाः स्युः। इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ १२॥६॥**

अ० अनवर्णेति। अवर्णं नञ्पूर्वं 'न विद्यतेऽवर्णो येषु तेऽनवर्णाः, 'अन् स्वरे' (३।२।१२९) नञ्स्य अन्, ततो जस्। नमनं नामः। नामोऽस्यास्तीति नामी 'अतोऽनेकस्वरात्' (७।२।६) इति इन्। 'अवर्णेवर्णस्य' (७।४।६८) इति अस्य लोपः। सिः। 'इन्हन्पूषा०' (१।४।८७) इति दीर्घः। ईः। 'दीर्घङ्या०' (१।४।४५) इति सिलोपः। 'नाम्नो नोऽनह्नः' (२।१।९१) इति नलोपः ॥६॥

## ॡदन्ताः समानाः ॥१।१।७॥

**ॡकारावसाना वर्णाः समानाः स्युः। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ १० ॥७॥**

अ० ॡत् अन्ते येषां ते ॡदन्ताः। समानमानं समानं तुल्यं मानं परिणाममेषां ते समानाः। 'समानस्य धर्मादिषु' (३।२।१४९) इति समानस्य सः ॥७॥

## ए ऐ ओ औ सन्ध्यक्षरम् ॥१।१।८॥

**ए ऐ ओ औ इत्येते वर्णाः सन्ध्यक्षराणि स्युः ॥८॥**

अ० एश्च ऐश्च ओश्च औश्च, जस्। सूत्रत्वाल्लोपः। 'डुधांग्क् धारणे' धा। सम्। सन्धानं सन्धिः। 'उपसर्गादः किः' (५।३।८७) 'इडेत्पुसि चातो लुक्' (४।३।९४) न क्षरति न चलति प्रधानत्वादक्षरम्। सन्धौ सत्यक्षरं सन्ध्यक्षरम्। ८॥

## अं अः अनुस्वारविसर्गौ ॥१।१।९॥

**अकारावुच्चारणार्थौ। अं इति नासिक्यो वर्णः। अः इति च कण्ठ्यः। तौ यथासङ्ख्यमनुस्वारविसर्गौ**